चाद्र्ययति मनः इति सुन्दरी। उन्द क्ली क्लेदे सुपूर्व्वः नाम्नोति चरः निपातनादुल्लोपः नदादित्वादीप्। रूपलावण्यसम्पन्ना सुन्दरी। इति तट्टीकायां भरतः॥ तत्रभेदः। इति मेदिनी॥ हरिद्रा। इति शब्दचन्द्रिका॥ त्रिपुरसुन्दरी। यथा,—

"चङ्गुष्ठानामिकायोगात् वामहस्तस्य पार्व्वति।
तर्पयेत् सुन्दरीं देवीं समुद्राच सवाहनाम्॥"

इति तन्त्रसारे श्रीविद्याप्रकरणम्॥ योगिनीविशेषः। यथा,—

"तावन्मन्त्रं जपेद्विद्वान् यावदायाति सुन्दरी।
ज्ञात्वा दृढ़ं साधकेन्द्रं निशीथे याति निश्चितम्॥"

इति तत्रैव योगिनीसाधनप्रकरणम्॥

सुन्भ, दुलौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-हिंसे सक०-सेट्।) सुन्भते। इति दुर्गादासः॥

सुन्वन्,[त्] त्रि,यज्ञकर्त्ता।"सुञो यज्ञसंयोगे।" ३।२।१३२। इति सुनोतेः शतृप्रत्ययः॥ सर्व्वे सुन्वन्तः।सर्व्वे यजमानाः सत्रिणः। इति सिद्धान्तकौमुदी॥

सुपक्वः, पुं, (सु+पच्+क्तः।) सुगन्ध्याम्रः। इति शब्दचन्द्रिका॥ शोभनपरिणते, त्रि॥ (यथा, भागवते। १।८।४०।

"इमे जनपदाः स्वृद्धाः सुपक्वौषधिवीरुधः।
वनाद्रिनद्युदन्वन्तो ह्येधन्ते तव वीक्षिताः॥")

सुपत्रं, क्ली, (शोभनं पत्रमस्य।) तेजपत्रम्। इति शब्दचन्द्रिका॥

सुपत्रः,पुं,(शोभनं पत्रमस्येति।) आदित्यपत्रः। पत्रिवाहलक्षणम्। इति राजनिर्घण्टः॥

सुपत्रकः, पुं, (शोभनं पत्रमस्य। कप्।) शिग्रुः। इति राजनिर्घण्टः॥ (शिग्रुशब्देऽस्य विशेषो ज्ञातव्यः॥)

सुपत्रा, स्त्री, (शोभनं पत्रमस्याः।) रुद्रजटा। शतावरी। पालक्यम्। शमी। शालपर्णी। इति राजनिर्घण्टः॥

सुपत्रिका, स्त्री, जतुका। इति राजनिर्घण्टः॥

सुपथः, पुं, (सु शोभनः पन्थाः। अः समासे।) सन्मार्गः। यथा,—

"सत्पथस्त्वतिपन्थाश्च सुपन्थाः सुपथोऽपि च।"

इति शब्दरत्नावली॥

(यथा, कथासरित्सागरे। २०।१८२।

"विपथाक्रम्यमाणा हि तिष्ठन्ति सुपथे कथम्॥"

शोभनपथयुक्ते, त्रि॥

सुपथ्या, स्त्री,(सुष्ठु पथ्यं यस्याः।) श्वेतचिल्ली। इति राजनिर्घण्टः॥ सत्पथ्ये, त्रि॥

सुपन्थाः पुं,(शोभनः पन्थाः।) सत्पथः। इति शब्दरत्नावली॥

सुपद्मः, पुं, पद्मनाभदत्त-कृतव्याकरणविशेषः। यथा,—

"धैर्य्याबधेयं धीराः श्रीपद्मनाभनिवेदितम्।
उक्तो व्याकरणादर्शः सुपद्मस्तस्य पञ्जिका॥
ततो हि बालबोधाय प्रयोगाणाञ्च दीपिका।
उणादिवृत्ती रचिता च धातुकौमुदी॥"

इति तदीयपरिभाषावृत्तिः॥

(पुं, क्ली। शोभनं पद्मम्।) शोभनपद्मश्च। शोभनपद्मविशिष्टे, त्रि॥

सुपद्मा, स्त्री, वचा। इति शब्दचन्द्रिका॥

सुपर्णः, पुं, (सुष्ठु पर्णं पक्षो यस्य।) गरुड़ः। इत्यमरः। १।१।२१॥ (यथा, रघुः। १०।६१।

"उह्यन्ते स्म सुपर्णेन वेगाकृष्टपयोमुचा॥")

स्वर्णचूड़पक्षी। कृतमालकवृक्षः। इति मेदिनी (पक्षिमात्रम्। यथा, मनुः। १।३७।

"नागान् सर्पान् सुपर्णांश्च पितॄणाञ्च पृथग्-गणान्॥"

विष्णुः। इति महाभारतम्। १३। १४९। ३४॥) शोभनपर्णविशिष्टे, त्रि॥

सुपर्णकः,पुं,(सु शोभनानि पर्णानि यस्य। कन्।) आरग्वधवृक्षः। इति रत्नमाला॥ सप्तच्छद-वृक्षः। इति जटाधरः॥ गरुड़ः। इति हेमचन्द्रः॥

सुपर्णकेतुः, पुं, (सुपर्णः केतौ यस्य।) विष्णुः। इति हलायुधः॥

सुपर्णा, स्त्री, (सु शोभनानि पर्णानि पत्राणि यस्याः।) पद्मिनी। इति शब्दमाला॥

सुपर्णाख्यः, पुं, (सुपर्ण इति आख्या यस्य।) नागकेशरः। इति त्रिकाण्डशेषः॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"दीपः सर्पः सुपर्णाख्यश्चाम्पेयो नागकेशरः॥")

सुपर्णिका, स्त्री, (शोभनानि पर्णानि यस्याः। कप्। टापि अत इत्वम्।) स्वर्णजीवन्ती। पलाशी। शालपर्णी। रेणुका। वाकुची। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका
शशिलेखा कृष्णफला सोमा पूतिफलीति च।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

सुपर्णी, स्त्री, (सुष्ठु पर्णान्यस्याः। गौरादित्वात् ङीष्।) कमलिनी। गरुड़माता। इति मेदिनी॥(पक्षिणीमात्रे च। यथा,महाभारते। १।२२४।१०।

"सुपर्णी सा तदा भूत्वा निर्जगाम महावनात्")

सुपर्णीतनयः, पुं, (सुपर्ण्यास्तनयः।) गरुड़ः। इति हलायुधः॥

सुपर्व्वा, [न्] पुं, (सुष्ठु पर्व्व यस्य।) देवताः। इत्यमरः। १।१।७॥ वाणः। वंशः। पर्व्व। धूमः। इति मेदिनी॥

सुपर्व्वा, स्त्री,(शोभनं पर्व्व यस्याः।) श्वेतदूर्व्वा इति राजनिर्घण्टः॥ सुन्दरपर्व्वविशिष्टा च॥

सुपाक्यं,क्ली,(सुपाकाय हितम्। सुपाक+यत्। विड़्लवणम्। इति राजनिर्घण्टः॥

सुपात्रं, क्ली, (सुष्ठु पात्रम्।) योग्यव्यक्तिः। (यथा, भागवते। ७।१४।४१।

"पुरुषेष्वपि राजेन्द्र सुपात्रं ब्राह्मणं विदुः।
तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुम्॥")

तत्र दानविधिर्यथा,—

"तस्मात्सर्व्वात्मना पात्रे दद्यात्कनकदक्षिणाम्
इति।
सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतन्तं त्रायते यस्मादतीव नरकार्णवादिति॥
पात्रशास्त्राध्यात्मिका मुख्या विद्यावान्मि-
होत्रिणः।
देवताश्च तथा मुख्या गोदानं च तदुत्तममिति॥
सर्व्वत्र गुणवद्दानं श्वपाकादिष्वपि स्मृतम्।
देशे काले विधानेन पात्रे दत्तं विशेषतः॥"

पात्रे विद्यातपस्यादिगुणयुक्ते। इति च प्रायश्चित्ततत्त्वम्॥ अपि च।

"तस्मात् सर्व्वात्मना पात्रे दद्यात् कनकमुत्तमम्।
अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे॥"

इति शुद्धितत्त्वम्॥ ॥

शोभनभाजनम्। शोभनञ्च तत्पात्रञ्चेति कर्म्मधारयसमासनिष्पन्नम्। उत्तमपात्रयुक्ते, त्रि॥

सुपानः, त्रि, (सुखेन पीयते इति। सु+पा+"आतो युच्।" ३।३।१२८। इति युच्।) पानयोग्यः। सुखेन पीयतेऽसौ। आतोऽनोऽद-रिद्र इत्यनेन कर्म्मणि अनप्रत्ययेन निष्पन्नः। इति मुग्धबोधव्याकरणम्॥

सुपार्श्वः, पुं,(सुष्ठु पार्श्वोऽस्य।) चतुर्व्विंशति-वृत्तार्हदन्तर्गतवृत्तार्हद्विशेषः। इति हेमचन्द्रः॥ प्लक्षवृक्षः। इति राजनिर्घण्टः॥ पक्षिविशेषः। स तु सम्पातिपुत्त्रः। यथा,—

"निर्दग्धपक्षं सम्पातिं वानराः सुमहौजसः।"

इत्युपक्रम्य।

"क्व सीता केन वा दृष्टा को वा हरति मैथिलीम्।
तदाख्यातु भवान् सर्व्वं गतिर्भव वनौकसाम्॥
अहरीन् प्रतिसंयुक्तान् सीताश्रुतिसमाहितान्
पुनराश्वासयन् प्रीत इदं वचनमब्रवीत्॥
अहमस्मिन् गिरौ दुर्गे बहुयोजनमायते।
चिरान्निपतितो वृद्धः क्षीणप्राणपराक्रमः॥
तं मामेवं गतः पुत्त्रः सुपार्श्वो नाम नामतः।
आहारेण यथाकालं बिभर्त्ति पततां वरः॥"

इति वाल्मीकीये रामायणे किष्किन्ध्याकाण्डे ५९ सर्गः॥ (पीठस्थानविशेषः। यथा, देवीभागवते। ७।३०।६६।

"नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी॥"

इलावृतवर्षस्य पर्व्वतविशेषः। यथा, विष्णुपुराणे। २।२।१७।

"विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः॥)

सुपार्श्वकः, पुं, (सुष्ठु पार्श्वो यस्य। कन्।) चतुर्व्विंशतिभाव्यर्हदन्तर्गतार्हद्विशेषः। इति हेमचन्द्रः॥ गर्द्दभाण्डवृक्षः। इत्यमरः। २।४।४३॥ (अथ पिप्पलभेदः। गजदुण्डसहोरा इति लोके।

"पारीषोऽन्यः पलाशश्च कपिचूतः कमण्डलुः।
गर्द्दभाण्डष्कन्दरालः कपीतनः सुपार्श्वकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)